Ramsaday College, Amta
Prepared by — Mousumi Adhikari
Sanskrit Department
Section — C, Abhijñāna — Śakuntalam (V—VII)
3rd Semester, Honours

Abhijñāna — Śakuntalam (V—VII)

1) हंसपदिका का आसीत्?
उत्तरः — हंसपदिका दुष्यन्तस्य प्रथमा पत्नी आसीत्।
2) दुष्यन्तस्य राजपुरोहितः कः आसीत्?
उत्तरः — दुष्यन्तस्य राजपुरोहितः उपाध्याय सोमरातः आसीत्।
3) पतिकुले कस्य दास्यमपि क्षमम्?
उत्तरः — पतिकुले स्त्रीजनस्य दास्यमपि क्षमम्।
4) राजभवनं प्राप्य शकुन्तला किं निमित्तम् अनुभवति?
उत्तरः — राजभवनं प्राप्य शकुन्तलायाः दक्षिणनयनं विस्फुरति।
5) मातलिः कस्य सारथिः?
उत्तरः — मातलिः इन्द्रस्य सारथिः।
6) गौतमी कास्ति?
उत्तरः — गौतमी महर्षिकण्वस्य धर्मभगिनी।
7) तरवः कदा नम्राः भवन्ति?
उत्तरः — तरवः फलागमे नम्राः भवन्ति।
8) सर्वदमनः कः आसीत्?
उत्तरः — सर्वदमनः शकुन्तलायाः पुत्रः आसीत्।
9) अभिज्ञानशकुन्तले विदूषकस्य नाम किम् आसीत्?
उत्तरः — अभिज्ञानशकुन्तले विदूषकस्य नाम माधव्य आसीत्
10) अभिज्ञानाभरणं किमासीत्?
उत्तरः — अभिज्ञानाभरणं दुष्यन्तस्य नामाङ्कितम् अङ्गुलीयक आसीत्।
11) का मिश्रकेशी?
उत्तरः — मिश्रकेशी मेनकायाः प्रियसखी एका अप्सरसि
P.T.O

Ramsaday College, Amta
Prepared by — Mousumi Adhikari

12) शकुन्तलायाः अङ्गुलीयकं केन मत्स्येन गलाधः कृतम्?
उत्तरः — शकुन्तलायाः अङ्गुलीयकं रोहितमत्स्येन गलाधः कृतम्।

13) अदितिः का आसीत्?
उत्तरः — अदितिः महर्षिकश्यपस्य धर्मपत्नी, देवानां माता, दक्षस्य कन्या आसीत्।

14) दुष्यन्तः केन तिरस्कृतः अभवत्?
उत्तरः — दुष्यन्तः हंसपदिकायाः सङ्गीतेन तिरस्कृतः अभवत्।

15) सानुमती का आसीत्?
उत्तरः — सानुमती शकुन्तलायाः माता मेनकायाः [illegible] सखि काचित् अप्सरा।

16) 'कुम्भीरक' शब्दस्य कोऽर्थः?
उत्तरः — 'कुम्भीरक' शब्दस्य अर्थः चौरः।

17) धीवरस्य निवासः कुत्र आसीत्?
उत्तरः — धीवरस्य निवासः शक्रावतारे आसीत्।

18) 'मित्रावसुः' कः आसीत्?
उत्तरः — मित्रावसुः राजश्यालकः राष्ट्रीयाध्यक्षः आसीत्।

19) शकुन्तलायाः प्रतिकृतिः केन अङ्किता?
उत्तरः — शकुन्तलायाः प्रतिकृतिः दुष्यन्तेन अङ्किता।

20) पिशुनः कः आसीत्?
उत्तरः — पिशुनः दुष्यन्तस्य अमात्यः आसीत्।

21) धनमित्रः कः आसीत्?
उत्तरः — धनमित्रः समुद्रव्यवहारी सार्थवाहः आसीत्।

22) धनमित्रः कीदृशः आसीत्?
उत्तरः — धनमित्रः निःसन्तानः आसीत्।

23) सर्वदमनस्य अपरं नाम किमासीत्?
उत्तरः — सर्वदमनस्य अपरं नाम भरतः आसीत्।

24) नाटकस्य अन्तिममाङ्गलिकः श्लोकः कः भवति?
उत्तरः — नाटकस्य अन्तिममाङ्गलिकः श्लोकः भरतवाक्यम् भवति।